रुद्राक्षजाबालोपनिषत् ॥ ९१ ॥

रुद्राक्षोपनिषद्वेद्यं महारुद्रतयोज्वलम् ।
प्रतियोगिविनिर्मुक्तं शिवमात्रपदं भजे ॥ १ ॥

ॐ आप्यायन्त्विति शान्तिः ॥

हरिः ॐ ॥ अथ हैनं कालाग्निरुद्रं भुसुण्डः[1] पप्रच्छ कथं रुद्राक्षोत्पत्तिः । तद्धारणात्किं फलमिति । तं होवाच भगवान्कालाग्निरुद्रः । त्रिपुरवधार्थमहं निमीलिताक्षोऽभवम् । तेभ्यो जलबिन्दवो भूमौ पतितास्ते रुद्राक्षा जाताः । सर्वानुग्रहार्थाय तेषां नामोच्चारमात्रेण दशगोप्रदानफलं दर्शनस्पर्शनाभ्यां द्विगुणं फलमत ऊर्ध्वं वक्तुं न शक्नोमि । तत्रैते श्लोका भवन्ति । कस्मिंस्थितं तु किं नाम कथं वा धार्यते नरैः । कतिभेदमुखान्यत्र कैर्मन्त्रैर्धार्यते कथम् ॥ १ ॥ दिव्यवर्षसहस्राणि चक्षुरुन्मीलितं मया । भूमावक्षिपुटाभ्यां तु पतिता जलबिन्दवः ॥ २ ॥ तत्राश्रुबिन्दवो जाता महारुद्राक्षवृक्षकाः । स्थावरत्वमनुप्राप्य भक्तानुग्रहकारणात् ॥ ३ ॥ भक्तानां धारणात्पापं दिवारात्रिकृतं हरेत् । लक्षं तु दर्शनात्पुण्यं कोटिसद्धारणाद्भवेत् ॥ ४ ॥ तस्य कोटिशतं पुण्यं लभते धारणान्नरः । लक्षकोटिसहस्राणि लक्षकोटिशतानि च ॥ ५ ॥ तत्प्राप्नुते पुण्यं नरो रुद्राक्षधारणात् । धात्रीफलप्रमाणं यच्छ्रेष्ठमेतदुदाहृतम् ॥ ६ ॥ बदरीफलमात्रं तु मध्यमं प्रोच्यते बुधैः । अधमं चणमात्रं स्यात्प्रक्रियैषा मयोच्यते ॥ ७ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चेति शिवाज्ञया । वृथा जाताः पृथिव्यां तु तज्जातीयाः शुभाक्षकाः ॥ ८ ॥ श्वेतास्तु ब्राह्मणा ज्ञेयाः क्षत्रिया रक्तवर्णकाः । पीतास्तु वैश्या विज्ञेयाः कृष्णाः शूद्रा उदाहृताः ॥ ९ ॥ ब्राह्मणो बिभृयाच्छ्वेतान्रक्तान्राजा तु धारयेत् । पीतान्वैश्यस्तु बिभृयात्कृष्णान्छूद्रस्तु धारयेत् ॥ १० ॥ समाः स्निग्धा दृढाः स्थूलाः कण्टकैः संयुताः शुभाः । कृमिदष्टं भिन्नभिन्नं कण्टकैर्हीनमेव च ॥ ११ ॥ व्रणयुक्तमयुक्तं च षड्रुद्राक्षा विवर्जयेत् । स्वयमेव कृतं द्वारं रुद्राक्षं स्यादिहोत्तमम् ॥ १२ ॥ यत्तु पौरुषयत्नेन कृतं तन्मध्यमं भवेत् । समान्स्निग्धान्दृढान्स्थूलान्क्षौमसूत्रेण धारयेत् ॥ १३ ॥ सर्वगात्रेण सौम्येन सामान्यानि विचक्षणः । निकषे हेमरेखाभा यस्य रेखा प्रदृश्यते ॥ १४ ॥ तदक्षमुत्तमं विद्यात्तद्धार्यं शिवपूजकैः । शिखायामेकरुद्राक्षं त्रिशतं शिरसा वहेत् ॥ १५ ॥

---

१ भुसुण्ठः.

षट्त्रिंशतं गले दध्याद्बाहोः षोडश षोडश । मणिबन्धे द्वादशैव स्कन्धे पञ्चशतं वहेत् ॥ १६ ॥ अष्टोत्तरशतैर्मालामुपवीतं प्रकल्पयेत् । द्विसरं त्रिसरं वापि सराणां पञ्चकं तथा ॥ १७ ॥ सराणां सप्तकं वापि बिभृयात्कण्ठदेशतः । मुकुटे कुण्डले चैव कर्णिकाहारकेऽपि वा ॥ १८ ॥ केयूरकटके सूत्रं कुक्षिबन्धे विशेषतः । सुप्ते पीते सदाकालं रुद्राक्षं धारयेन्नरः ॥ १९ ॥ त्रिंशतं त्वधमं पञ्चशतं मध्यममुच्यते । सहस्रमुत्तमं प्रोक्तमेवं भेदेन धारयेत् ॥ २० ॥ शिरसीशानमंत्रेण कण्ठे तत्पुरुषेण तु । अघोरेण गले धार्यं तेनैव हृदयेऽपि च ॥ २१ ॥ अघोरबीजमन्त्रेण करयोर्धारयेत्सुधीः । पञ्चाशदक्षग्रथितान्व्योमव्याप्यपि चोदरे ॥ २२ ॥ पञ्च ब्रह्मभिरङ्गैश्च त्रिमाला पञ्च सप्त च । ग्रथित्वा मूलमन्त्रेण सर्वाण्यक्षाणि धारयेत् ॥ २३ ॥ अथ हैनं भगवन्तं कालाग्निरुद्रं भुसुण्डः पप्रच्छ रुद्राक्षाणां भेदेन यदक्षं यत्स्वरूपं यत्फालमिति । तत्स्वरूपं मुखयुक्तमरिष्टनिरसनं कामाभीष्टफलं ब्रूहीति होवाच । तत्रैते श्लोका भवन्ति—एकवक्त्रं तु रुद्राक्षं परतत्त्वस्वरूपकम् । तद्धारणात्परे तत्त्वे लीयते विजितेन्द्रियः ॥ १ ॥ द्विवक्त्रं तु मुनिश्रेष्ठ चार्धनारीश्वरात्मकम् । धारणादर्धनारीशः प्रीयते तस्य नित्यशः ॥ २ ॥ त्रिमुखं चैव रुद्राक्षमग्नित्रयस्वरूपकम् । तद्धारणाच्च हुतभुक्तस्य तुष्यति नित्यदा ॥ ३ ॥ चतुर्मुखं तु रुद्राक्षं चतुर्वक्त्रस्वरूपकम् । तद्धारणाच्चतुर्वक्त्रः प्रीयते तस्य नित्यद॥ ४ ॥ पञ्चवक्त्रं तु रुद्राक्षं पञ्चब्रह्मस्वरूपकम् । पञ्चवक्त्रः स्वयं ब्रह्म पुंहत्या च व्यपोहति ॥ ५ ॥ षड्वक्त्रमपि रुद्राक्षं कार्तिकेयाधिदैवतम् । तद्धारणान्महाश्रीः स्यान्महदारोग्यमुत्तमम् ॥ ६ ॥ मतिविज्ञानसंपत्तिशुद्धये धारयेत्सुधीः । विनायकाधिदैवं च प्रवदन्ति मनीषिणः ॥ ७ ॥ सप्तवक्त्रं तु रुद्राक्षं सप्तमालाधिदैवतम् । तद्धारणान्महाश्रीः स्यान्महदारोग्यमुत्तमम् ॥ ८ ॥ महती ज्ञानसंपत्तिः शुचिर्धारणतः सदा । अष्टवक्त्रं तु रुद्राक्षमष्टमात्राधिदैवतम् ॥ ९ ॥ वस्वष्टकप्रियं चैव गङ्गाप्रीतिकरं तथा । तद्धारणादिमे प्रीता भवेयुः सत्यवादिनः ॥ १० ॥ नववक्त्रं तु रुद्राक्षं नवशक्त्यधिदैवतम् । तस्य धारणमात्रेण प्रीयन्ते नव शक्तयः ॥ ११ ॥ दशवक्त्रं तु रुद्राक्षं यमदैवत्यमीरितम् । दशाप्रशान्तिजनकं[1] धारणान्नात्र संशयः ॥ १२ ॥ एकादशमुखं त्वक्षं रुद्रैकादशदैवतम् । तदिदं दैवतं प्राहुः सदा सौभाग्यवर्धनम् ॥ १३ ॥

---

१ दर्शनाच्छान्तिजनकं पापानां नात्र.

रुद्राक्षं द्वादशमुखं महाविष्णुस्वरूपकम्। द्वादशादित्यरूपं च बिभर्त्येव हि तत्परम् ॥ १४ ॥ त्रयोदशमुखं त्वक्षं कामदं सिद्धिदं शुभम्। तस्या धारणमात्रेण कामदेवः प्रसीदति ॥ १५ ॥ चतुर्दशमुखं चाक्षं रुद्रनेत्रसमुद्भवम्। सर्वव्याधिहरं चैव सर्वदारोग्यमाप्नुयात् ॥ १६ ॥ मद्यं मांसं च लशुनं पलाण्डुं शिग्रुमेव च। श्लेष्मातकं विड्वराहमभक्ष्यं वर्जयेन्नरः ॥ १७ ॥ ग्रहणे विषुवे चैवमयने संक्रमेऽपि च। दर्शेषु पूर्णमासे च पूर्णेषु दिवसेषु च। रुद्राक्षधारणात्सद्यः सर्वपापैः प्रमुच्यते ॥१८॥ रुद्राक्षमूलं तद्ब्रह्मा तन्नालं विष्णुरेव च। तन्मुखं रुद्र इत्याहुस्तद्विन्दुः सर्वदेवताः ॥१९॥ इति। अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छाधीहि भगवन्रुद्राक्षधारणविधिम्। तस्मिन्समये निदाघजडभरतदत्तात्रेयकात्यायनभरद्वाजकपिलवसिष्ठपिप्पलादादयश्च कालाग्निरुद्रं परिसमेत्योचुः। अथ कालाग्निरुद्रः किमर्थं भवतामागमनमिति होवाच। रुद्राक्षधारणविधिं वै सर्वे श्रोतुमिच्छामह इति। अथ कालाग्निरुद्रः प्रोवाच। रुद्रस्य नयनादुत्पन्ना रुद्राक्षा इति लोके ख्यायन्ते। अथ सदाशिवः संहारकाले संहारं कृत्वा संहाराक्षं मुकुलीकरोति। तन्नयनाज्जाता रुद्राक्षा इति होवाच। तस्माद्रुद्राक्षत्वमिति कालाग्निरुद्रः प्रोवाच। तद्रुद्राक्षे चाग्निषये कृते दशगोप्रदानेन यत्फलमवाप्नोति तत्फलमश्नुते। स एष भस्मज्योती रुद्राक्ष इति। तद्रुद्राक्षं करेण स्पृष्ट्वा धारणमात्रेण द्विसहस्रगोप्रदानफलं भवति। तद्रुद्राक्षे कर्णयोर्धार्यमाणे एकादशसहस्रगोप्रदानफलं भवति। एकादशरुद्रत्वं च गच्छति। तद्रुद्राक्षे शिरसि धार्यमाणे कोटिगोप्रदानफलं भवति। एतेषां स्थानानां कर्णयोः फलं वक्तुं न शक्यमिति होवाच। य इमां रुद्राक्षजाबालोपनिषदं नित्यमधीते बालो वा युवा वा वेद स महान्भवति। स गुरुः सर्वेषां मन्त्राणामुपदेष्टा भवति एतैरेव होमं कुर्यात्। एतैरेवार्चनम्। तथा रक्षोघ्नं मृत्युतारकं गुरुणा लब्धं कण्ठे बाहौ शिखायां वा बध्नीत। ससद्वीपवती भूमिर्दक्षिणार्थं नावकल्पते। तस्माच्छ्रद्धया यां कांचिद्गां दद्यात्सा दक्षिणा भवति। य इमामुपनिषदं ब्राह्मणः सायमधीयानो दिवसकृतं पापं नाशयति। मध्याह्नेऽधीयानः षड्जन्मकृतं पापं नाशयति। सायं प्रातः प्रयुञ्जानोऽनेकजन्मकृतं पापं नाशयति। षट्सहस्रलक्षगायत्रीजपफलमवाप्नोति। ब्रह्महत्यासुरापानस्वर्णस्तेयगुरुदारगमनतत्संयोगपातकेभ्यः पूतो भवति। सर्वतीर्थफलमश्नुते। पतितसंभाषणात्पूतो

भवति । पञ्चिंशतसहस्रपावनो भवति । शिवसायुज्यमवाप्नोति । न च पुनरावर्तते न च पुनरावर्तत इत्योंसत्यमित्युपनिषत् ॥ हरिः ॐ तत्सत् ॥

ॐ आप्यायन्त्विति शान्तिः ॥

इति रुद्राक्षजाबालोपनिषत्समाप्ता ॥ ९१ ॥

गणपत्युपनिषत् ॥ ९२ ॥

यं नत्वा मुनयः सर्वे निर्विघ्नं यान्ति तत्पदम् ।
गणेशोपनिषद्वेद्यं तद्ब्रह्मैवासि सर्वगम् ॥ १ ॥

ॐ भद्रं कर्णेभिरिति शान्तिः ॥

हरिः ॐ ॥ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं कर्तासि । त्वमेव केवलं धर्तासि । त्वमेव केवलं हर्तासि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्मासि नित्यं । ऋतं वच्मि । सत्यं वच्मि । अव त्वं माम् । अव वक्तारम् । अव[1] श्रोतारम् । अव दातारम् । अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव[2] पुरस्तात् । अव चोत्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् । त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दाद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि । सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि[3] । त्वं गुणत्रयातीतः । त्वं कालत्रयातीतः । त्वं देहत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवःसुवरोम्[4] । गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम् । अनुस्वारः परतरः । अर्धेन्दुलसितम् ॥१॥ तारेण[5] रुद्धम् । एत-

---

१ अव श्रोतारं अव वक्तारमिति मु. वैलोम्यं दृश्यते. २ पुरस्तात् दक्षिणात्तात् पश्चात्तात् उत्तरात्तादिति मु. पु. पाठः. ३ वाक्परिमितानि पदानि. ४ त्वं रुद्रः । त्वमग्निः इति भिन्नवाक्यानि अन्ते च. त्वं भूर्भुवः सुवरापोऽम् इति पाठः. ५ तारेण युक्तमेतदेव तव इति मु. उ. पा.